**Bachelor of Science (B.Sc.) Semester—II (CBS) Examination**

**SANSKRIT**

**Compulsory Paper—2**

समयः — होरात्रयम्] [पूर्णाङ्काः — 60

**सूचना** :— विशेषनिर्देशाभावे उत्तराणि स्वीकृतभाषया लिखत।

1. धनुर्विद्यापरीक्षायां कः यशस्वी अभवत् ? केन कारणेन च ? सविस्तरं लिखत।

**अथवा**

कलियुगस्य सामाजिक-दोषान् कलिविडम्बनस्य आधारेण वर्णयत। 12

2. सारांशं लिखत :

रामभरतयोः संवादः **अथवा** कौत्सस्य गुर्वर्थप्राप्तिः। 12

3. अनुवादं कुरुत :

(अ) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशः सुखकरी विद्या गुरुणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूजिता न तु धनं विद्याविहीनः पशुः।।

**अथवा**

या पाणिग्रहलालिता सुसरला तन्वी सुवंशोद्भवा
गौरी स्पर्शसुखावहा गुणवती नित्यं मनोहारिणी।
सा केनापि हृता तया विरहितो गन्तुं न शक्तोऽस्म्यहं
रे भिक्षो तव कामिनी ? नहि नहि प्राणप्रिया यष्टिका।। 6

(ब) निम्नलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि **संस्कृतेन** लिखत :

पापान्निवारयति योजयते हिताय
गुह्यं च गूहति गुणान् प्रकटीकरोति।
आपद्गतं न च जहाति ददाति काले
सन्मित्रलक्षणामिदं प्रवदन्ति सन्तः।।

(i) कः पापान्निवारयति ?

(ii) सन्मित्रं किं गूहति ?

(iii) सन्मित्रं किं प्रकटीकरोति ?

(iv) कः आपद्गतं न जहाति ?

(v) सन्मित्रं कदा ददाति ?

(vi) सन्मित्रस्य इदं लक्षण के प्रवदन्ति ? 6



rtmnuonline.com

4. टिप्पणीद्वयं लिखत :

(i) विष्णुशर्मा

(ii) भर्तृहरि:

(iii) डॉ. श्री भा. वर्णेकर:

(iv) जगन्नाथ पण्डित:। 12

5. वाक्यद्वयस्य ससंदर्भं स्पष्टीकरणं लिखत :

(अ) स्वधर्मेनिधनं श्रेय: इति आह मम प्रिय:।

**अथवा**

गायच्च पञ्चशीलं मम भारतं विजयते। 3

(ब) तं भारतस्य हृदयं तिलकं नमामि।

**अथवा**

नास्त्यदेयं महात्मनाम्। 3

(क) अनुरूपं योजयत :

| 'अ' | 'ब' |
|---|---|
| (i) नीतिविषयकम् | (a) व्यास: |
| (ii) चित्तैकाग्रयम् | (b) बापूजी अणे |
| (iii) तिलक प्रशंसा | (c) भर्तृहरि: 3 |

(ड) अनुरूपं योजयत :

| 'अ' | 'ब' |
|---|---|
| (i) मृच्छकटिकम् | (a) विशाखदत्त: |
| (ii) मुद्राराक्षसम् | (b) डॉ. वर्णेकर: |
| (iii) विवेकानन्दविजयम् | (c) शूद्रक: 3 |



rtmnuonline.com